# सुब्रह्मण्य-करावलम्बम्

हे स्वामिनाथ! करुणाकर दीन-बन्धो
श्री-पार्वतीश-मुख-पङ्कज-पद्म-बन्धो ।
श्रीशादि-देव-गण-पूजित-पाद-पद्म
वल्ली-सनाथ मम देहि करावलम्बम् ॥ १॥

देवाधि-देव-नुत देव-गणाधि-नाथ
देवेन्द्र-वन्द्य-मृदु-पङ्कज-मञ्जु-पाद ।
देवर्षि-नारद-मुनीन्द्र-सुगीत-कीर्ते
वल्ली-सनाथ मम देहि करावलम्बम् ॥ २॥

नित्यान्न-दान-निरताखिल-रोग-हारिन्
भाग्य-प्रदान-परिपूरित-भक्त-काम ।
श्रुत्यागम-प्रणव-वाच्य-निज-स्वरूप
वल्ली-सनाथ मम देहि करावलम्बम् ॥ ३॥

क्रौञ्चासुरेन्द्र-परिखण्डन शक्ति-शूल-
चापादि-शस्त्र-परिमण्डित-दिव्य-पाणे ।
श्रीकुण्डलीश-धृततुण्ड शिखीन्द्र-वाह
वल्ली-सनाथ मम देहि करावलम्बम् ॥ ४॥

देवाधि-देव-रथ-मण्डल-मध्यमेत्य
देवेन्द्र-पीडनकरं दृढ-चाप-हस्तम् ।
शूरं निहत्य सुर-कोटिभिरीड्यमान
वल्ली-सनाथ मम देहि करावलम्बम् ॥ ५॥

हीरादि-रत्न-मणि-युक्त-किरीट-हार
केयूर-कुण्डल-लसत्-कवचाभिरामम् ।
हे वीर तारक-जयामर-वृन्द-वन्द्य
वल्ली-सनाथ मम देहि करावलम्बम् ॥ ६॥

पञ्चाक्षरादिम्-अनु-मन्त्रित-गाङ्ग-तोयैः
पञ्चामृतैः प्रमुदितेन्द्र-मुखैर्मुनीन्द्रैः ।
पट्टाभिषिक्त-हरि-युक्त-वरासन-स्थ
वल्ली-सनाथ मम देहि करावलम्बम् ॥ ७॥

श्री-कार्तिकेय करुणामृत-पूर्ण-दृष्ट्या
कामादि-रोग-कलुषीकृत-दुष्ट-चित्तम् ।
सिक्त्वा तु मामव कलाधर-कान्ति-कान्त्या
वल्ली-सनाथ मम देहि करावलम्बम् ॥ ८॥

सुब्रह्मण्याष्टकं पुण्यं ये पठन्ति द्विजोत्तमाः ।
ते सर्वे मुक्तिमायान्ति सुब्रह्मण्य-प्रसादतः ॥

सुब्रह्मण्याष्टकमिदं प्रातरुत्थाय यः पठेत् ।
कोटि-जन्म-कृतं पापं तत्क्षणादेव नश्यति ॥

॥ इति श्रीसुब्रह्मण्याष्टकं अथवा श्रीसुब्रह्मण्य करावलम्बस्तोत्रं सम्पूर्णम् ॥

# Subrahmaṇya-karāvalambam

he svāminātha! karuṇākara dīna-bandho
śhrī-pārvatīśha-mukha-paṅkaja-padma-bandho ।
śhrīśhādi-deva-gaṇa-pūjita-pāda-padma
vallī-sanātha mama dehi karāvalambam ॥ 1॥

devādhi-deva-nuta deva-gaṇādhi-nātha
devendra-vandya-mṛdu-paṅkaja-mañju-pāda ।
devarṣhi-nārada-munīndra-sugīta-kīrte
vallī-sanātha mama dehi karāvalambam ॥ 2॥

nityānna-dāna-niratākhila-roga-hārin
bhāgya-pradāna-paripūrita-bhakta-kāma ।
śhrutyāgama-praṇava-vāchya-nija-svarūpa
vallī-sanātha mama dehi karāvalambam ॥ 3॥

krauñchāsurendra-parikhaṇḍana śhakti-śhūla-
chāpādi-śhastra-parimaṇḍita-divya-pāṇe ।
śhrī-kuṇḍalīśha-dhṛta-tuṇḍa-śhikhīndra-vāha
vallī-sanātha mama dehi karāvalambam ॥ 4॥

devādhi-deva-ratha-maṇḍala-madhyametya
devendra-pīḍanakaraṃ dṛḍha-chāpa-hastam ।
śhūraṃ nihatya sura-koṭibhirīḍyamāna
vallī-sanātha mama dehi karāvalambam ॥ 5॥

hīrādi-ratna-maṇi-yukta-kirīṭa-hāra
keyūra-kuṇḍala-lasat-kavachābhirāmam ।
he vīra tāraka-jayāmara-vṛnda-vandya
vallī-sanātha mama dehi karāvalambam ॥ 6॥

pañchākṣharādim-anu-mantrita-gāṅga-toyaiḥ
pañchāmṛtaiḥ pramuditendra-mukhair munīndraiḥ ।
paṭṭābhiṣhikta-hari-yukta-varāsana-stha
vallī-sanātha mama dehi karāvalambam ॥ 7॥

śhrī-kārtikeya karuṇāmṛta-pūrṇa-dṛṣhṭyā
kāmādi-roga-kaluṣhīkṛta-duṣhṭa-chittam ।
siktvā tu māmava kalādhara-kānti-kāntyā
vallī-sanātha mama dehi karāvalambam ॥ 8 ॥

subrahmaṇyāṣhṭakaṃ puṇyaṃ ye paṭhanti dvijottamāḥ ।
te sarve muktimāyānti subrahmaṇya-prasādataḥ ॥

subrahmaṇyāṣhṭakam idaṃ prātarutthāya yaḥ paṭhet ।
koṭi-janma-kṛtaṃ pāpaṃ tatkṣhaṇādeva naśhyati ॥

॥ iti śhrīsubrahmaṇyāṣhṭakaṃ athavā śhrīsubrahmaṇya
karāvalambastotraṃ sampūrṇam ॥